# 2018

## M.A.

## Part–II Examination

## SANSKRIT

### PAPER—V

*Full Marks* : 100

*Time* : 4 Hours

*The figures in the right-hand margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

*Illustrate the answers wherever necessary.*

First half – 60 Marks

**1.** एकः प्रश्नः समाधेयः – 10

(क) मम्मटमते काव्यकारणं यथाग्रन्थमालोच्यताम्।

(ख) काव्यप्रकाशस्य मङ्गलश्लोकमुल्लिख्य व्याख्यायताम्।

(ग) सप्रसङ्ग व्याख्यायताम् –

(i) क्वचित् स्फुटालङ्कारेऽपि न काव्यत्वहानिः।

(ii) शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम्।

**2.** एकः प्रश्नः समाधेयः – 10

(क) संकेतितार्थः कतिविधः ? के च ते ? सोदाहरणम् आयोच्यन्ताम्।

(ख) लक्षणाविभागः सोदाहरणं प्रस्तूयताम्।

(ग) सप्रसङ्ग व्याख्यायताम् -

(i) सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते।

(ii) नाभिधा समयाभावात्।

**3.** प्रश्नद्वयं समाधेयम् – 10×2

(क) सलक्षणं समेदं सोदाहरणं रूपकस्वरूपं मम्मटानुसारं प्रस्तुयताम्।

(ख) सलक्षणं सोदाहरणं द्वयं व्याख्येयम् –

शब्दश्लेषः, अनन्वयः, अपहनुतिः, अर्थान्तरन्यासः।

(ग) सयुक्तिकं सलक्षणमलङ्कारनिर्णयः क्रियाताम् -

(i) नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम्।
मृदुलतान्तलतान्तमलोकयत् स सुरभिं सुरभिं सुमनोहरैः।।

(ii) कोकिलोऽहं भवान् काकः समानः कालिमावयोः।
अन्तरं कथयिष्यन्ति काकलीकोविदाः पुनः।।





(घ) उभयोर्मध्ये पार्थक्यं निरूपयत --

(i) उपमारूपकयोः।

(ii) विभावनाविशेषक्त्योः।

**4.** एकः प्रश्नः समाधेयः – 14

(क) ध्वनिविरोधिमतवादेषु भाक्तवादिमतम् उपस्थाप्यताम्।

(ख) ध्वनिस्वरूपम् आनन्दवर्धनदिशा आलोच्यताम्।

**5.** सप्रसङ्गं व्याख्येया – 6

(क) काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।
क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः।।

(ख) आलोकार्थी यथा दीपशिखायां यत्नवाञ्जनः।
तदुपायतया तद्वदर्थे वाच्ये तदादृतः।।

## Second Half – 40 Marks

**1.** नाट्यशास्त्रस्य प्रथमाध्याये उल्लिखितं मुख्य-विषयमवलम्ब्य कश्चन प्रबन्धो विरच्यताम् 14

अथवा

भट्टलोल्लटस्योत्पत्तिवादं निरूपयत।

2. (क) अधोलिखितेषु कस्यचिदेकस्य व्याख्या कार्या -- 6

(i) न वेदव्यवहारोऽयं संश्राव्य शूद्रजातिषु।

तस्मात्सृजापरं वेदं पञ्चमं सार्ववर्णिकम्॥

(ii) ग्रहणे धारणे ज्ञाने प्रयोगे चास्य सत्तम।

अशक्ता भगवन् देवा अयोग्या नाट्यकर्मणि॥

(iii) नानानामाश्रयोत्पन्नं निघण्टुं निगमान्वितम्॥

*अथवा*

(ख) अधोलिखितेषु यथेच्छं द्वितयस्य टीका लेख्या --

जर्जरः, कैशिकीवृत्तिः, कारिका, हास्यरसः।

3. का नाम अर्थप्रकृतिः ? तस्याः भेदाः सोदाहरणं व्याख्यातव्याः। 14

*अथवा*

व्याख्याताम् --

वस्तु नेता रसस्तेषां भेदकः।

4. अधोलिखितेषु यथेच्छं द्वितयस्य टीका लेख्या -- 6

नृत्यम्, विष्कम्भकः, प्ररोचना, गर्भसन्धिः।

---